ISSN : 2350-0700

# शोधज्योतिः
# Śodhajyotiḥ

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य
UGC CARE अनुसूच्यां समाविष्टा एवं पुनरीक्षिता सन्दर्भिता शोधपत्रिका
UGC CARE Listed & a Peer Reviewed Research Journal of Shree Somnath Sanskrit University

वर्षम् - ०५ अङ्कः-०५ जनवरी-दिसम्बर-२०२३

***Chief Editor***
Prof. (Dr.) Sukanta Kumar Senapati

***Managing Editor***
Prof. (Dr.) Vinod Kumar Jha

***Editors***
Dr. Narendrakumar Pandya
Dr. Janakisharan Acharya
Dr. Kartik Pandya
Dr. Jigar Bhatt
Smt. Apoorva Agrawal
Dr. Vidushi Bolla
Dr. Bhagavati Dabhi

**श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्**
(राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा A+ श्रेण्या प्रत्यायितः)

*Publisher:*

**Dr. Dasharath Jadav**

Registrar, Shree Somnath Sanskrit University, Veraval

*Managing Editor*

**Prof. (Dr.) Vinod Kumar Jha**

*Editorial Committee*

**Dr. Narendrakumar Pandya**

**Dr. Janakisharan Acharya**

**Dr. Kartik Pandya**

**Dr. Jigar Bhatt**

**Smt. Apoorva Agrawal**

**Dr. Vidushi Bolla**

**Dr. Bhagavati Dabhi**

***Note :*** *The statements and views expressed by the authors of articles in this Journal are their own and not necessarily of the Editorial Committee. The responsibility of the facts stated, opinions expressed, or conclusions reached, is entirely that of the author of respective research article and that Shree Somnath Sanskrit University accepts no responsibility for them.*

| | | |
|---|---|---|
| *ISSN* | : | 2350-0700 |
| *Registration No.* | : | GH/SH/4/GSU/2997/1607/Pt-III/KH-1 dated 11-04-2005 |
| *Published by* | : | Shree Somnath Sanskrit University, Veraval, Gujarat – 362265 |
| *Price* | : | ₹ 482.00 (For India) |
| *Address* | : | Shree Somnath Sanskrit University, Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat, India-362265 |
| *Telephone* | : | (+91-2876) 244531, 244532 |
| *Email* | : | shodhjyoti@gmail.com |
| *Website* | : | www.sssu.ac.in |

# विषयानुक्रमणिका


| | | | |
|---|---|---|---|
| १ | संस्कृतज्ञैर्निर्मिता स्वाधीनतासङ्ग्रामभूमिका | रमाकान्तपाण्डेयः | ०१ |
| २ | भारतीयसाहित्यशास्त्रपरिप्रेक्ष्ये कुन्तकस्य वक्रोक्तिविचारः | प्रो. (डॉ.) ललितकुमारः पटेलः | १२ |
| ३ | मुद्राराक्षसे निरूपितव्यवसायवैविध्यम् | डॉ. डायालालः मालदेभाई मोकरिया | २२ |
| ४ | चातुर्वर्ण्यं मया सृष्टम् | डॉ. पङ्कजकुमार एस्. रावल | ३४ |
| ५ | जीवनाचारविचिकित्सानामार्षोपायाः | डॉ. उमामहेश्वरी बी. | ४० |
| ६ | अद्वैतवेदान्ते मोक्षस्वरूपविमर्शः | डॉ. जानकीशरण आचार्यः | ४६ |
| ७ | ग्रहजन्यरोगाः तच्छमनोपायाश्च | डॉ. नित्यानन्द ओझा | ५५ |
| ८ | शाब्दबोधे प्राधान्यविमर्शः | डॉ. विदुषी बोल्ला | ६५ |
| ९ | गर्भसंस्कारे गर्भसंवादस्य महत्त्वम् | डॉ. भैरवी दीक्षितः | ७२ |
| १० | श्रीमद्भगवद्गीता प्रस्थानत्रय्याम् एका दार्शनिकी धारा | डॉ. विपुल जादवः | ८० |
| ११ | धातुसंज्ञाविचारः | डॉ. के. श्यामसुन्दर | ८६ |
| १२ | कालिदासीयकाव्येषु शब्दसम्पत् | डॉ. सौम्यजित् सेनः | ९७ |
| १३ | पाणिनीयव्याकरणे नवाचारसर्जनस्य अवधारणा | पण्ड्या योगेशः एन् | १०१ |
| १४ | पाणिनीयतन्त्राभिमतः कर्मत्वविमर्शः | लोकेशकुमारः<br>प्रो. (डॉ.) विनोद कुमार झा | १०५ |
| १५ | वैदिकज्ञानपरम्परायां कृषेः स्वरूपं भेदाश्च | पद्मराज रेग्मी | ११५ |
| १६ | नामकरण संस्कार का प्रायोगिक लाभ | राजकुमार झा<br>प्रो. बृजमोहन सिंह | १२५ |
| १७ | वैदिकवाङ्मय में नारी के विविधरूप | डॉ. राहुल कुमार झा | १३१ |
| १८ | Solutions of Some Problems in Sanskrit Grammar | Prof. (Dr.) Vinod Kumar Jha | १३५ |
| १९ | Sardar Patel and Veer Nariman | Dr. Vasant Patel | १४२ |
| २० | Delineation of *Rasa* in the *Śrīkṛṣṇakarṇāmṛtam* of Bilvamaṅgala | Dr. Kartik Pandya | १६३ |
| २१ | Madhuvidyā - whether it is a Parā Vidyā or Aparā Vidyā - An Advaitic Analysis | Dr. Sebika Nag | १७० |
| २२ | Search Engines: An Introduction | Ravindra S. Kale<br>Dr. Rajeshkumar Gamit | १८२ |
| २३ | Maya Angelou's Message of Survival in the poem "And Still I Rise" | Dr. Bhagavati P. Dabhi | १९५ |
| २४ | River *Sarayū:* The Lifeline of *Ayodhyā* | Dr. Satheesh Kumar Kandoth | २०४ |
| २५ | Understanding the Agreements and Disagreements between Nyāya, Vyākaraṇa, and Mīmāṃsā school of Indian Philosophy on the concept of Ākhyāta in the light of Verbal Cognition. | Dr. Shweta A. Jejurkar<br>Swaraja G. Salaskar | २१३ |

वर्षम्-०५ अङ्कः-०५
जनवरी-दिसम्बर, २०२३

शोधज्योतिः
ISSN-2350-0700

# जीवनाचारविचिकित्सानामार्षोपायाः

- डॉ. उमामहेश्वरी बी.[1]

अस्माकं भारतीयज्ञानपरम्परा अत्यन्तविपुला विशाला अनन्ता च। अनादिकालत एव शिष्टाचारपरम्परायाः पौराः भारतीया इत्यस्ति लोकोक्तिः। तस्यां परम्परायां प्रबोधितसूक्ष्मतत्त्वानाम् आलोडनं कृत्वा 'रामादिवद्वर्तितव्यं न रावणादिवदि'ति सततं प्रेरणादायकवचांसि उद्बोधितानि। तानि प्रेरकवाक्यानि सुहृद्वाक्यानि सत्यवाक्यानि मनसि निधाय व्यवहारे लौकिकजीवने आचरणेन अहं मम इति स्वार्थ-परिच्छिन्नभावनातः विभज्य वसुधैवकुटुम्बकमिति एकत्वभावना प्रतिपद्यते। तेन सर्वसमस्याः स्वयमेव निराकरिष्यन्ते सर्वत्र शान्तिः प्रसार्यते। तर्हि सर्वत्र उपनिषत्सु कथं ते उपायाः प्रतिपादिता इति विचारयामः।

**"आचारहीनं न पुनन्ति वेदाः"**.[2] **'आचारः परमो धर्मः'**.[3] इत्याचारस्य प्रामुख्यम् अनादिकालादद्यापि द्रष्टुं शक्यते। तत्र उपनिषत्सु आचारव्यवहारविषये भूतानां विषये भोगादृष्टादीनां विषये स्पष्टोपदेशः कृतो वर्तते। जीवनं कथं यापनीयं, लक्ष्याः के स्युः? तत्सिद्धिसाधनानि कानि? इत्यादिविषयेषु उपनिषदः अस्मान् बोधयन्ति शिक्षयन्ति च।

दृश्यमानदृष्टान्तैः अदृश्यमानविषयान् तत्त्वानि प्रबोध्य जीवनं सुखमयकरणाय मार्गं प्रशस्तीकुर्वन्ति उपनिषदः। वेदानामन्तिमभागत्वेन प्रतिपन्नाः एताः मानवजीवनस्य अन्तिमलक्ष्यैकनिष्ठस्थिरीकरणाय आत्यन्तिकतया सर्वदुःखनिवारणाय मानससरोवरे नीरक्षीरविवेकहंसवद् भारतीयज्ञानपरम्परायां राराजमानाः अद्यापि सर्वैः वास्तविकरूपेणाद्रियमानाः दृश्यन्ते। मातरं विना पुत्रस्य गतिर्यथा नास्ति, गुरुं विना आत्मज्ञानं नास्ति। तथैवोपनिषदः विना आत्मज्ञानं नास्ति।

दृश्यमानसंसारे जरायुजाण्डजश्वेदजोद्भिज्जादिशरीरवन्तः सर्वे प्राणिनः केनचित् लौकिकाऽलौकिककारणेन द्वैविध्यवशात् वा चिन्ताक्रान्ताः सन्तः क्वचिद्विचारे मग्ना दृश्यन्ते। यथा- पिता पुत्रस्य विवाहाय चिन्तयति, विवाहात्परं तस्य पुत्रो न जातः इति विचारयति, जाते पुत्रे काणो

---

१ सहायिकाचार्या, दर्शनविभागः, श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्।
२ वसिष्ठस्मृतिः- ६/३ एवं देवीभागवतम् – ११/२/१।
३ मनुस्मृतिः १.१०८।

वा मूकश्चेत्पुनः असन्तुष्टो भवति, अथवा सम्यग्विद्यार्जनं न करोति तर्हि विचिन्तयति, सम्यग्विद्यामर्जयति तथापि प्रथमस्थानं नास्तीति व्यथां प्राप्नोति, प्रथमस्थाने प्राप्ते उद्योगः नास्तीति खिन्नो भवति, उद्योगप्राप्ते सति तस्य विवाहो न जात इति क्लिश्नाति, विवाहे सति पुत्रवधूविषये विचारयति, पुनस्तेषां पुत्राणां पौत्राणामेवं रूपेण सर्वदा सामान्यसमस्याभिः कचिद्विशिष्टसमस्याभिर्वा विवेकिनोऽपि क्वचित् विचारयन्तः दरीदृश्यन्ते। **"न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्"**[४] इति गीता तत्र प्रमाणम्। एवं विचारं कृत्वापि तस्य परिवर्तनं ते कर्तुमसमर्थाः। अत व्यर्थविचारान् त्यक्त्वा सुकर्माणि करणीयाणीति ईशावास्योपनिषदि – **'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः'**[५] इति मन्त्रेण उपदिष्टमस्ति। अर्थात् इह अग्निहोत्रादीनि कर्माणि निर्वहन्नेव शतसङ्ख्याकाः समाः जीवितुमिच्छेत् इति विधितं वर्तते। एवं निःसङ्गभावेन कर्माणि आचरिते सति शुभाशुभकर्मभ्यां न लिप्यते। तेन सर्वप्राणिभिः कामितं दुःखं मे कदापि मा भूयादिति यत् तस्य सिद्धिर्भवति।

मातापितरौ चिन्तयतः यत् मे पुत्रः सदा आवाभ्यां सहैव वसेत्, सोऽस्मान् परित्यज्य कदापि कुत्रापि न व्रजेत्, आवाभ्यां न द्विषेत्, स्नेहेन नः परिचर्यां कुर्यात्, स्वमित्राणां पुरतः अवहेलनं न कुर्यात्, मातापित्रोः मनसः असौविध्ययुक्तं कर्म कदापि नाचरेत्, सदा भक्तिश्रद्धावान् भवेत् इत्यनेकशः परिचिन्तयतः। परन्तु पुत्रेषु ईदृशभावनाः स्वभावाः आचाराश्च कथमुत्पद्यन्ते? **'यद्बीजं वपते येन तत्फलं लभते ध्रुवम्'** यादृशं बीजं क्षितौ निक्षिप्यते तदेव कार्यम् अङ्कुररूपेणोत्पद्यमान् वृक्षो भूत्वा फलं ददाति। आम्रफलमपेक्षितं तर्हि कारवेल्लबीजवपनेन तदशक्यमिति सर्वैः सुविज्ञैः अवगन्तव्यम्। अथ च स्वयम् आचर्य जीवनं सार्थकं कर्तव्यम्। तद्दृष्ट्वा पुत्राः शिष्या अपि शिक्षेरन्। तदपि आचरणं कर्मण्यनासक्तो भूत्वा कुर्यात्। **"कर्मण्येवाधिकारस्ते'**[६] इति गीतोपनिषदः वचनात्।

आचारव्यवहारविषये स्नातकोत्तरदीक्षासमये गुरुः शिष्याननुदिशति तत्सर्वैः सर्वदा स्मर्तव्यम् – **"सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। सत्यान्न प्रमदितव्यम्। धर्मान् न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्। देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि कर्माणि। तानि सेवितव्यानि। नो इतराणि। श्रद्धया देयम्। अश्रद्धया अदेयम्। श्रिया देयम्। ह्रिया देयम्। भिया देयम्। संविदा देयम्।**[७] इति। एवं विधोपदेशेन शिष्यः स्वकर्तव्यं स्वजीवनशैलीं आचारव्यवहारविषयञ्च ज्ञात्वा लौकिकसमस्याभ्यः मुक्तो भवितुमर्हति।

---

[४] श्रीमद्भगवद्गीता अध्यायः-३, श्लोकः-५।

[५] ईशावास्योपनिषत् – २।

[६] श्रीमद्भगवद्गीता – २.४७।

[७] तैत्तिरीयोपनिषद् – शिक्षावल्ली-प्रश्नः-१, मं-१९-२२।

**लालसाविषये** प्रतिपादिमस्ति यथा - **"मा गृधः कस्यस्विद्धनम्"**.[८], अर्थात् स्वस्य वा परस्य धनविषयाकाङ्क्षां मा कुरु। **शोकमोहविषये** प्रतिपादितम्-

**"यस्तु सर्वाणि भूतान्यात्मैवाभूद्विजानतः।**
**तत्र को मोहः कः शोक एकत्वमनुपश्यतः॥**[९]

यस्य सर्वाणि भूतानि आत्मैवाभूत् तस्य पुरुषस्य को मोहः, कः शोकः। शोकश्च मोहश्च कामकर्मबीजम्। यत्रैकत्वं सिद्धं तत्र कामः क्व (न भवतीति तात्पर्यम्)। **ईर्ष्याघृणाविषये** प्रोक्तमस्ति-

**'यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति।**
**सर्वभूतेषु चात्मानं ततो न विजुगुप्सते'** ॥[१०]

यः पुरुषः सर्वभूतानि आत्मन्येव पश्यति आत्मानं च सर्वभूतेषु चानुपश्यति सः विजिगुप्सां घृणां न करोति।

जीवने स्वस्य जिह्वा स्वाधीने भवति तर्हि सर्वोऽपि लोकः स्वाधीने भवति। अतः " **जिह्वा मे मधुमत्तमा"**.[११] मे जिह्वा मधुमती-अतिशयेन मधुरभाषिणी स्यात् इति प्रार्थना वर्तते। तेन अनवसरविवादेभ्यः दूरतां प्राप्नुमः। एवमेव प्रातः सर्वप्रथमं पृथिव्याः वन्दनं दैनन्दिनचर्या भवेत् तत्र निर्दिष्टो वर्तते मृत्तिकोपनिषदि यथा –

**'भूमिर्धेनुर्धरणी लोकधारणी। मृत्तिके हन मे पापं यन्मया दुष्कृतं कृतम्। मृत्तिके ब्रह्मदत्तासि। काश्यपेनाभिमन्त्रिता। मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितम्।**[१२] अर्थात् 'हे धरणि! मया यत् दुष्कृतं कृतं पापमाचरितं तत् नाशय। हे भूमि! त्वं ब्रह्मणा दत्तासि, कश्यपर्षिणा अभिमन्त्रिताऽसि। हे लोकधारिणि! त्वयि सर्वं प्रतिष्ठितमस्ति अतः मे पुष्टिं देहि' इति प्रातरुत्थाय सर्वशक्तिमय्यां धरण्यां पादक्षेपणात्पूर्वमेवं प्रार्थनायां कृतायां सत्यां सा लोकपावनी धरणी अस्मान् अनर्थेभ्यः सततं रक्षति।

जीवनं प्रतिनित्यं दैवस्मरणेन यापनीयम्, तेन मनोबुद्धी च पवित्रे भवतः। तर्हि तदर्थं प्रार्थनामन्त्रो यथा - **"यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतम्। तत्र इन्द्रो वरुणो बृहस्पतिस्सविता च पुनन्तु पुनः पुनः"**। तथैव **ज्येष्ठवन्दनेन तेषां सङ्गत्याः** फलमेवमुट्टङ्कितमस्ति – **"चरणं पवित्रं विततं पुराणं**

---

[८] ईशावास्योपनिषद्- मन्त्रः-१।
[९] ईशावास्योपनिषद् – मं-७।
[१०] ईशावास्योपनिषद् – मं-६।
[११] तैत्तिरीयोपनिषद्- १.७।
[१२] मृत्तिकासूक्तम् – ३-१। महानारायणोपनिषत्।

**येन पूतं तरति दुष्कृतानि। तेन पवित्रेण शुद्धेन पूता अतिपाप्मानम् अशति तरेम"॥** अर्थात् येषामाचरणं पवित्रं भवति तेषां सेवनेन वयमपि तरेमेति।

**सत्यकथनफलम्** – कलियुगे तावत्सर्वैः स्वात्मनः लौकिककलाभाय सत्यमिवासत्यमुपयुज्यमानाः अहं सत्यमेव वच्मीति वदन्तः इतोपि पापं प्राप्नुवन्ति। तर्हि सत्यकथनेन किं भवतीति चेत्, **"सत्यमेव जयति नानृतं सत्येन पन्था विततो देवयानः".**[१३] ॥ अर्थात् सत्यवानेव जयति सत्येन अनृतं, सत्यवादिना अनृतवाद्यभिभूयते। सर्वदा सत्यस्यैव जयो भवति। सत्येन स्वस्य कीर्तिरपि विश्वे जेगीयते सत्यहरिश्चन्द्रचरित्रवत्। तथा सर्वदा श्रोतृभ्यां भद्रवाक्यान्येव श्रोतव्याणि भद्रमेव द्रष्टव्यम् इति प्रतिपादितं यथा – **'भद्रं कर्णेभिः शृणुयाम देवाः, भद्रं पश्ये माक्षभिर्यजत्राः".**[१४]। सर्वेषामपि जीवानां जीवनपोषकस्य अन्नस्य महिमा सर्वप्राणिभिः ज्ञातव्या।

**अन्नमन्त्राः** - तस्य विषये तैत्तिरीयोपनिषदि प्रतिपादितमस्ति – **'अन्नं ब्रह्मेति व्यजानात्'.**[१५]। अन्नं ब्रह्मेति जानीहि। **अन्नाद्धेव खल्विमानि भूतानि जायन्ते। अन्नेन जातानि जीवन्ति। अन्नं न निन्द्यात्, तद्व्रतम्।** अन्नस्य निन्दां तिरस्कारं च कदापि न कुर्यात्। तत् व्रतमस्ति। **'अन्नं न परिचक्षीत'** अर्थात् अन्नस्य परीक्षणं कदापि न कुर्यात्। **'अन्नं बहु कुर्वीत'** अर्थात् अन्नम् अधिकं सम्पादयेत्। **अद्यतेऽत्ति च भूतानि।** अन्नं भुज्यमपि भोक्तापि च भवति। **अन्नवान् अन्नादो भवति** अर्थात् यो अन्नवान् भवति स एव अन्नस्य स्वामी एवम् अन्नभोक्ता अपि भवति। तेन प्रजया पशुभिः ब्रह्मवर्चसेन च महान् भवति, महतीं कीर्तिं च विन्दति।.[१६] इति।

**अतिथिसत्कारमहिमा** – अतिथिसत्कारोऽस्माकं धर्मः **'अतिथिदेवो भव'.**[१७] इति श्रुतिवचनात्। **'वैश्वानरः प्रविशत्यतिथिर्ब्राह्मणो गृहान्'.**[१८]। अर्थात् अतिथिरूपेण साक्षात् अग्निरेव गृहान् दहन्निव प्रविशति। तस्य दाहप्रशमनाय अर्घ्य-पाद्य-आसनादिद्वारा तस्य शान्तिं परिचर्यां च कुर्यात्।

**'आशाप्रतीक्षे सङ्गतं सूनृतां चेष्टापूर्ते पुत्रपशूंश्च सर्वान्।**
**एतद् वृङ्क्ते पुरुषस्याल्पमेधसो यस्यानश्नन् वसति ब्राह्मणो गृहे'** ॥.[१९] इति कथोपनिषदि।

---

[१३] मुण्डकोपनिषद् – ३-१-६।
[१४] गणपत्यथर्वशीर्षोपनिषत् शान्तिमन्त्रः।
[१५] तैत्तिरीयोपनिषद्- ब्रह्मानन्दवल्ली २-२
[१६] तैत्तिरीयोपनिषद्-३-१।
[१७] तैत्तिरीयोपनिषद् – १.२०।
[१८] कठोपनिषद् – १.१.७।
[१९] कठोपनिषद्-८।

अर्थात् यस्य गृहे अतिथिः भोजनं विना तिष्ठति तस्य गृहे **आशा-** अनिर्ज्ञातप्राप्येष्टार्थप्रार्थना, निर्ज्ञातप्राप्यार्थप्रतीक्षणं **प्रतीक्षा, सत्सङ्गफलम् प्रियवाक्फलम् इष्टापूर्तफलम्** (इष्टं यागादि पूर्तं वाप्यारामादिजन्यम्) **पुत्रान् पशूंश्च** सर्वं विनश्यतीति। अतः अतिथिः यः कोऽपि वा भवतु सः पूज्य इति मत्वा सर्वविधपरिचर्याः निष्ठयाऽचरणीयाः। **'अभ्यागतः स्वयं विष्णुः'** इति स्मृतिः। सदाचारवर्जितजीवनेन तत्फलभूतं मशकसूकरादिजन्म स्यादिति जीवं सचेतयन् प्रतिबोधयति श्रुतिः **"योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः। स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम्॥**[२०] येषां जीवनं सदाचारवर्जितं भवति ते शुनकसूकरादि अथ च तरुगुल्मादिजन्मानि प्रपद्येरन्। अथ च **'यथा प्रज्ञं हि संभवाः'** जन्म स्वस्वबुद्ध्यनुसारं भवतीति अन्यापि श्रुतिस्तत्र प्रामाणिकी।

**इन्द्रियनिग्रहफलम् – 'यस्त्वविज्ञानवान् भवत्ययुक्तेन मनसा सदा। तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः॥**[२१] **यस्तु विज्ञानवान् भवति युक्तेन मनसा सदा। तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः॥**[२२] श्लोकयोरनयोः प्रतिपादितं वर्तते यत् यः सर्वदा अविवेकी असंयमितमनस्को भवति तस्य इन्द्रियाणि स्वाधीने न भवन्ति, अकुशलसारथेः दुष्टाश्वा इव प्रवर्तन्ते। परन्तु यः कुशलः सर्वदा समाहितमनस्को भवति तस्याधीने इन्द्रियाणि तथैव भवन्ति यथा कुशलसारथेः सदश्वाः। अतः मनः स्वाधीने भवति तर्हि ब्रह्माण्डं स्वाधीने, यदि पराधीनं मनः सर्वं भयाह्वयं भवति। अतः एतेषां नियन्त्रणम् अत्यन्तमावश्यकम्। **'मन एव मनुष्याणां कारणं बन्धमोक्षयोः'** इति विवेकचुडामण्यां श्रीमच्छङ्कराचार्यैः प्रशस्तम्। अथ च **'आशायाः ये दासाः ते दासाः सर्वलोकस्य। आशा येषां दासी तेषां दासायते लोकः'**॥ इत्यपि प्रसिद्धलोकोक्तिः श्रूयते।

रात्रौ दुःस्वप्नदूरीकरणाय प्रोक्तमस्ति – दूर्वा दुःस्वप्ननाशिनी अर्थात् यदि शयनसमये दूर्वां समीपे स्थापयित्वा शयनं कुर्मस्तर्हि दुःस्वप्नानि नश्यन्तीति।

**स्वाध्यायप्रशंसा –** यदस्माभिः श्रुतं तस्य सततं स्वाध्यायप्रवचनाभ्यां मन्तव्यम्। यतो हि स्वाध्यायप्रवचनाभ्यां यत्फलं तत् यथा "ऋतं च स्वाध्याय प्रवचने च। सत्यं च स्वाध्यायप्रवचने च। शमश्च दमश्च अग्नयश्च अग्निहोत्रञ्च मानुषञ्च स्वाध्यायप्रवचने च समं भवति। तप इति तपोनित्यं

---

[२०] कठोपनिषद् – वल्ली-५, मं-७।
[२१] कठोपनिषद् – वल्ली-३, मं-५।
[२२] कठोपनिषद् – वल्ली-३, मं-६।

पौरुशिष्टिः पौरुष इष्टिः । तद्धितास्तद्धि तपः । एवं प्रकारेण प्रत्येकमपि विषयं सूक्ष्मतया विशदीकुर्वन् जिज्ञासया प्राप्तं शिष्यं करुणया दयया च बोधयति गुरुः । तर्हि गुरोः महिमा विषये छान्दोग्योपनिषदि hप्रतिपादितमस्ति यत् – **'श्रुतं ह्येव मे भगवद्दृश्येभ्य आचार्याद्धैव विद्या विदिता साधिष्ठं प्रापतीति तस्मै हैतदेवोवाचात्र ह न किञ्चन वीयायेति वीयायेति'**[२३] ॥

**"मा हिंस्यात्सर्वभूतानि" "सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि"** इत्यादीनि वज्रतुल्यानि वाक्यानि उपनिषत्सु बहूनि प्रतिपादितानि सन्ति। येषां सम्यगाचरणेन व्यवहारे क्षुद्रविषयानादाय प्रवर्तमानसमस्याभ्यः तीर्त्वा प्रसादं प्राप्तुं विविधोपायान् परिपालितुं प्रभवामः ।

## सन्दर्भग्रन्थसूची


१. मन्त्रपुष्पम् – परिष्कर्ता स्वामी श्री देवरूपानन्दः, रामकृष्ण मठ, मुम्बई, २००३ ।

२. कठोपनिषत्, मुद्रक तथा प्रकाशक – घनश्यामदास जालान, गीताप्रेस- गोरखपुर, २००८ ।

३. मुण्डकोपनिषत् – सानुवाद शाङ्करभाष्यसहित, प्रकाशक – गीताप्रेस-गोरखपुर, १९९२ ।

४. छान्दोग्योपनिषत्- सानुवाद शाङ्करभाष्यसहित, प्रकाशक – गीताप्रेस-गोरखपुर, १९९२ ।

५. ईशावास्योपनिषत् – सानुवाद शाङ्करभाष्यसहित, प्रकाशक – गीताप्रेस-गोरखपुर, १९९२ ।

६. गणपत्यथर्वशीर्षोपनिषत् – मन्त्रपुष्पम् – परिष्कर्ता स्वामी श्री देवरूपानन्दः, रामकृष्ण मठ, मुम्बई, २००३ ।

७. महानारायणोपनिषत्, मन्त्रपुष्पम्, रामकृष्णमठ, खार, मुम्बई ।

८. ईशादि नौ उपनिषद्, व्याख्याकार- हरिकृष्णदास गोयन्दका, मुद्रक् एवं प्रकाशक- मोतीलाल जालान, गीताप्रेस्, गोरखपुर ।


~~~~~*~~~~~*~~~~~*~~~~~

[२३] छान्दोग्योपनिषद् – ४.९.३
~~~~~